# S-III/1/22SMIS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-06)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अज्ञाततत्त्वावगमस्यैव प्रमात्वे को दोषः?
2. तार्किकमते प्रमाप्रमाणयोर्लक्षणं किम्?
3. प्राभाकरमते किं नाम प्रमाणम्?
4. प्रमाणद्वयमेवेति के वदन्ति?
5. इन्द्रियसन्निकर्षजन्यं ज्ञानं कतिविधम्? नाम लिखत।
6. अनुमानस्य लक्षणं किम्?
7. किं नाम तर्कः?
8. बौद्धमते व्याप्तिः कथं सिद्ध्यति?
9. किं नाम स्वार्थानुमानम्?
10. किं नाम शाब्दम्?
11. उपमानपदं लोके कुत्र प्रसिद्धम्?
12. अर्थापत्तिः कतिविधा? नाम निर्दिशत।
13. अभावप्रमाणस्य लक्षणं किम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रमाणलक्षणं सप्रसङ्गं व्याख्यात।
15. व्याप्तिविषये मतभेदं सोदाहरणं विवृणुत।

16. हेत्वाभासविषये लघुटिप्पणीं लिखत।

17. वाक्यार्थावगमकारणानाम् आकांक्षादीनां स्वरूपं सोदाहरणं विवृणुत।

18. अर्थापत्तेः द्वैविध्यम्, उदाहरणं, मतभेदञ्च ग्रन्थोक्तदिशा व्याख्यात।

19. अनुपलब्धिप्रमाणं संक्षेपेण विवृणुत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रमाणविषये लघुप्रबन्धमेकमारचयत।

21. अर्थापत्तेः प्रमाणान्तरत्वं संसाधयत।

22. अनुमानप्रमाणं सपरिकरं विवृणुत।

# S-III/2/22SMIS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-07)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. किं नाम गुणकर्म? किं प्रधानकर्म? उदाहरणं प्रदर्शयत।
2. स्तोत्रशस्त्रयोः लक्षणं किम्?
3. मन्त्रलक्षणं किम्? मन्त्रमेकमुदाहरत।
4. ऋग्यजुःसाम्नां लक्षणं किम्?
5. किं नाम एकं वाक्यम्?
6. अभ्यासस्य लक्षणमुदाहरणं च लिखत।
7. संज्ञया कर्मभेदस्य उदाहरणं किम्?
8. आधानविधायकवाक्यानि कानि?
9. किं नाम प्रकरणान्तरम्? उदाहरणं किम्?
10. अग्निहोत्रस्य नित्यत्वविधायकं वचनं किम्? नित्याग्निहोत्रस्य किं फलम्?
11. दर्शे कति यागाः सन्ति? के ते?
12. प्रयाजाः के?
13. द्वितीयाध्यायार्थः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. सम्मार्जनादीनां गुणकर्मत्वमाक्षिप्य समाधत्त।
15. मन्त्राधिकरणमारचयत।

16. अनुषङ्गाधिकरणं संक्षेपेण अनुवदत।
17. अभ्यासात् कर्मभेदं यथाग्रन्थं विवृणुत।
18. पात्नीवताधिकरणं यथाग्रन्थं विविच्य लिखत।
19. शाखान्तराधिकरणं ग्रन्थोक्तदिशा विवृणुत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. द्वितीयाध्यायसारं संगृह्य लिखत।
21. कर्मभेदबोधकप्रमाणविषये लघुटिप्पणीम् आरचयत।
22. मन्त्रलक्षणविभागादिविषये लघुप्रबन्धं रचयत।

# S-III/3/22SMIS3EDTC3L/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSE-2)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. किं नाम प्रमाणम्? का नाम प्रमा?
2. प्रमालक्षणे तत्त्वपदस्य सार्थक्यं कथम्?
3. प्राभाकरमते कति प्रमाणानि? कानि च तानि?
4. भाट्टमते सन्निकर्षः कतिविधः? नाम लिखत।
5. बौद्धमते किं नाम प्रत्यक्षम्?
6. का नाम व्याप्तिः?
7. तार्किकमते किं नाम पञ्चावयवम्? के ते अवयवाः?
8. शाब्दं कतिविधम्? निर्दिशत।
9. का नाम उपमितिः?
10. अर्थापत्तेः लक्षणं किम्?
11. अनुपलब्धेः करणं किम्?
12. अनुपलम्भः कतिविधः? नाम निर्दिशत।
13. पौराणिकानां मते कति प्रमाणानि सन्ति? कानि च तानि?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रमालक्षणं सदलकृत्यं विवृणुत।
15. सन्निकर्षविषये लघुटिप्पणीं लिखत।

16. अवयवविषये मतान्तरनिरासपुरस्सरं स्वमतं विवृणुत।

17. उपमानप्रमाणं ग्रन्थोक्तदिशा संक्षेपेण विवृणुत।

18. अर्थापत्तिलक्षणम् तदुदाहरणं तद्भेदांश्च यथाग्रन्थं विशदयत।

19. "अनुपलम्भस्तु द्विविधः" इतीमं प्रघट्टकं संक्षेपेण व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रत्यक्षप्रमाणं विमृश्य विवृणुत।

21. अनुपलब्धेः लक्षणं स्वरूपं विभागादिकञ्च आश्रित्य प्रबन्धमेकं विरचयत।

22. भाट्टसम्मतानि प्रमाणानि विमृश्य विवृणुत।

# S-III/4/22SMIS3EGTC4L/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (GE-3)

## मीमांसा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. स्मृतीनां धर्मे प्रामाण्यं कथम्? स्मृतिवचनमेकं प्रदर्शयत।
2. प्रत्यक्षश्रुतिविरुद्धस्मृतेः उदाहरणं किम्?
3. पिकनेमतामरसशब्दानाम् अर्थः कः?
4. आकृत्यधिकरणन्यायः कः?
5. चित्रायागस्य किं फलम्? तद्बोधकं वचनं किम्?
6. अग्निहोत्रशब्दस्य कर्मनामत्वे किं प्रमाणम्?
7. तद्व्यपदेशात् कर्मनामत्वं कुत्र?
8. वाजपेययागस्य फलं किम्? तत्र वचनं किम्?
9. वाक्यशेषात् अर्थनिर्णयः कुत्र?
10. सामर्थ्यानुसारेण अर्थनिर्णयस्य उदाहरणस्थलं निर्दिशत।
11. "यजमानः प्रस्तरः" इत्यत्र गौणीगुणः कः?
12. अष्टाकपालशब्दस्य अर्थः कः?
13. यवशब्दस्य आर्याणां म्लेच्छानां च कुत्र प्रसिद्धिः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. आर्यम्लेच्छाधिकरणं यथाग्रन्थं विवृणुत।
15. कल्पसूत्राणां धर्मप्रामाण्यमाक्षिप्य समाधत्त।

16. साधुशब्दप्रयुक्त्यधिकरणम् आरचयत।

17. उद्भित्पदस्य कर्मनामत्वं साधयत।

18. तत्प्रख्याधिकरणं ग्रन्थोक्तदिशा विवृणुत।

19. वाक्यशेषात् अर्थनिर्णयं सप्रसङ्गं सोदाहरणं च विवृणुत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. गौणीवृत्तिमधिकृत्य लघुप्रबन्धमेकमारचयत।

21. स्मृतिविषयं सप्रसङ्गं विमृश्य लिखत।

22. नामधेयत्वनिमित्तान्यधिकृत्य विमर्शात्मकप्रबन्धं लिखत।